শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে কিষ্কিন্ধাকাণ্ডে

# ॥ চতুর্দশঃ সর্গঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

# ॥ চতুর্দশঃ সর্গঃ ॥

## ৱালিনো ৱধায শ্রীরামস্যাশ্ৱাসনং প্রাপ্য সুগ্রীৱস্য ঘোরং গর্জনম্

সর্ৱে তে ৎৱরিতং গৎৱা কিষ্কিন্ধাং ৱালিনঃ পুরীম্।
ৱৃক্ষৈরাত্মানমাৱৃত্য ৱ্যতিষ্ঠন্ গহনে ৱনে॥ **4.14.1** ॥

ৱিসার্য সর্ৱতো দৃষ্টিং কাননে কাননপ্রিযঃ।
সুগ্রীৱো ৱিপুলগ্রীৱঃ ক্রোধমাহারযদ্ ভৃশম্॥ **4.14.2** ॥

ততস্তু নিনদং ঘোরং কৃৎৱা যুদ্ধায চাহ্ৱযৎ।
পরিৱারৈঃ পরিৱৃতো নাদৈর্ভিন্দন্নিৱাম্বরম্॥ **4.14.3** ॥

গর্জন্নিৱ মহামেঘো ৱাযুৱেগপুরঃসরঃ।
অথ বালার্কসদৃশো দৃপ্তসিংহগতিস্ততঃ॥ **4.14.4** ॥

দৃষ্টৱা রামং ক্রিযাদক্ষং সুগ্রীৱো ৱাক্যমব্রৱীৎ।
হরিৱাগুরযা ৱ্যাপ্তাং তপ্তকাঞ্চনতোরণাম্॥ **4.14.5** ॥

প্রাপ্তাঃ স্ম ধ্ৱজযন্ত্রাঢ্যাং কিষ্কিন্ধাং ৱালিনঃ পুরীম্।
প্রতিজ্ঞা যা কৃতা ৱীর ৎৱযা ৱালিৱধে পুরা॥ **4.14.6** ॥

সফলাং কুরু তাং ক্ষিপ্রং লতাং কাল ইৱাগতঃ।
এৱমুক্তস্তু ধর্মাত্মা সুগ্রীৱেণ স রাঘৱঃ॥ **4.14.7** ॥

তমেৱোৱাচ ৱচনং সুগ্রীৱং শত্রুসূদনঃ।
কৃতাভিজ্ঞানচিহ্নস্ত্বমনযা গজসাহ্ৱযা॥ **4.14.8** ॥

লক্ষ্মণেন সমুৎপাট্য এষা কণ্ঠে কৃতা তৱ।
শোভসেঽপ্যধিকং ৱীর লতযা কণ্ঠসক্তযা॥ **4.14.9** ॥

ৱিপরীত ইৱাকাশে সূর্যো নক্ষত্রমালযা।
অদ্য ৱালিসমুত্থং তে ভযং ৱৈরং চ ৱানর॥ **4.14.10** ॥

একেনাহং প্রমোক্ষ্যামি বাণমোক্ষেণ সংযুগে।
মম দর্শয সুগ্রীৱ ৱৈরিণং ভ্রাতৃরূপিণম্॥ **4.14.11** ॥

ৱালী ৱিনিহতো যাৱদ্বনে পাংসুষু চেষ্টতে।
যদি দৃষ্টিপথং প্রাপ্তো জীৱন্ স ৱিনিৱর্ততে॥ **4.14.12** ॥

ততো দোষেণ মা গচ্ছেৎ সদ্যো গর্হেচ্চ মাং ভৱান্।
প্রত্যক্ষং সপ্ত তে সালা মযা বাণেন দারিতাঃ॥ **4.14.13** ॥

তেনাৱেহি বলেনাদ্য ৱালিনং নিহতং রণে।
অনৃতং নোক্তপূর্ৱং মে চিরং কৃচ্ছ্রেঽপি তিষ্ঠতা॥ **4.14.14** ॥

ধর্মলোভপরীতেন ন চ ৱক্ষ্যে কথঞ্চন।
সফলাং চ করিষ্যামি প্রতিজ্ঞাং জহি সম্ভ্রমম্॥ **4.14.15** ॥

প্রসূতং কলমক্ষেত্রং ৱর্ষেণেৱ শতক্রতুঃ।
তদাহ্ৱাননিমিত্তং চ ৱালিনো হেমমালিনঃ॥ **4.14.16** ॥

সুগ্রীৱ কুরু তং শব্দং নিষ্পতেদ্ যেন ৱানরঃ।
জিতকাশী জযশ্লাঘী ৎৱযা চাধর্ষিতঃ পুরাৎ॥ **4.14.17** ॥

নিষ্পতিষ্যত্যসঙ্গেন ৱালী স প্রিযসংযুগঃ।
রিপূণাং ধর্ষিতং শ্রুৎৱা মর্ষযন্তি ন সংযুগে॥ **4.14.18** ॥

জানন্তস্তু স্বকং ৱীর্যং স্ত্রীসমক্ষং ৱিশেষতঃ।
স তু রামৱচঃ শ্রুৎৱা সুগ্রীৱো হেমপিঙ্গলঃ॥ **4.14.19**॥

ননর্দ ক্রূরনাদেন ৱিনির্ভিন্দন্নিৱাম্বরম্।
তত্র শব্দেন ৱিত্রস্তা গাৱো যান্তি হতপ্রভাঃ॥ **4.14.20**॥

রাজদোষপরামৃষ্টাঃ কুলস্ত্রিয ইৱাকুলাঃ।
দ্রৱন্তি চ মৃগাঃ শীঘ্রং ভগ্না ইৱ রণে হযাঃ।
পতন্তি চ খগা ভূমৌ ক্ষীণপুণ্যা ইৱ গ্রহাঃ॥ **4.14.21**॥

ততঃ স জীমূতকৃতপ্রণাদো
নাদং হ্যমুঞ্চৎ ৎৱরযা প্রতীতঃ।
সূর্যাত্মজঃ শৌর্যৱিৱৃদ্ধতেজাঃ
সরিৎপতির্ৱানিলচঞ্চলোর্মিঃ॥ **4.14.22**॥

॥ ইত্যার্ষে শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে
কিষ্কিন্ধাকাণ্ডে চতুর্দশঃ সর্গঃ॥